M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 295

Title: Bhavani Sahasra Nam Stotra

295

भवानी सहस्त्र नाम स्तोत्र

Bhawānī Sahasranāma	: Title
	: Author
	: Editor
	: Year, Vols.
	: Publisher
295	: Remarks

॥श्रीः

भवानीसहस्रनाम

१

॥श्रीजगदम्बायै नमः॥ ॥महाकालीमहालक्ष्मीमहासरस्वतीस्तोत्र
नमः॥ ॥कैलासशिखरे रम्ये देवदेवं महेश्वरं॥ ध्यानोपरतमासीनं प्रसन्नमु
खपंकजं॥ सुरासुरशिरोरत्नरंजितांघ्रियुगं प्रभुं॥ प्रणम्य नंदिको देवं बद्धां
जलिरभाषत॥२॥ नंदिकेश्वर उवाच देवदेव जगन्नाथ संशयोस्ति महान्म
म। रहस्यं किंचिदिच्छामि पृष्टुं त्वां भक्तवत्सल॥३॥ देवतायास्त्वया कस्याः स्तोत्रमेतद्दि
वानिशं॥ पठ्यते विरतं नाथ त्वत्तः किं सपरः परः॥४॥ इति पृष्टस्तदा शंभुर्नंदिकेन
जगद्गुरुः॥ प्रोवाच भगवानीशो विकसन्नेत्रपंकजः॥५॥ ईश्वर उवाच॥
साधु साधु गणश्रेष्ठ पृष्टवानसि मां वत्स॥ स्कंदस्यापि च यद्गोप्यं रहस्यं कथयामि

ते॥६॥ पुरा कल्पक्षये लोकान् सिसृक्षुर्मूढचेतनः॥ गुणत्रयमयी शक्तिर्मूलप्रकृतिसंज्ञि
ता॥७॥ तस्यामहं समुत्पन्नस्तत्वैस्तैर्महदादिभिः॥ चेतनेति ततः शक्तिर्मां काप्यालिंग्य
तस्थुषी॥८॥ हेतुः संकल्पजालस्य मनोधिष्ठायिनी शुभा॥ इच्छेति परमा शक्तिरु
न्मीमीलत ततः परं॥९॥ ततो वागिति विख्याता शक्तिः शब्दमयी पुरा॥ प्रादुरासीज्ज
गन्माता वेदमाता सरस्वती॥१०॥ ब्राह्मी च वैष्णवी रौद्री कौमारी पार्वती शिवा
॥ सिद्धिदा बुद्धिदा शांता सर्वमंगलदायिनी॥११॥ तयैतत्सृज्यते विश्वं निरा
धारं च धार्यते॥ ॥ तयैतत्पाल्यते विश्वं तस्यामेव प्रलीयते॥१२॥ अर्चिता

प्रणताघनाशना सर्वज्ञा भवविनाशिनी ॥ आराधिता स्तुता सैव सर्वसिद्धिप्रदायिनी ॥२३॥ तस्मा
त्तदनुग्रहाद्देवतामेव स्तुतवानहं ॥ सहस्रैर्नामभिर्दिव्यैस्त्रैलोक्यप्राणिपूजितैः ॥२४॥
स्तवेनानेन संतुष्टा मामेव प्रविवेश सा ॥ तदारभ्य मया प्राप्तमैश्वर्यं पदमुत्तमं ॥
२५ ॥ तत्प्रभावान्मया सृष्टं जगदेतच्चराचरं ॥ ससुरासुरगंधर्वयक्षराक्षसमानवं ॥
२६ ॥ सपन्नगसमुद्रं च सशैलवनकाननं ॥ सराशिग्रहनक्षत्रं पंचभूतगुणान्वितं ॥२७॥
नंदिन्नामसहस्रेण स्तवेनानेन सर्वदा ॥ स्तौमि तां परमां शक्तिं ममानुग्रहकारिणीं ॥
२८ ॥ एतच्छ्रुत्वा ततो देवं चराचरगुरुं विभुं ॥ प्रणम्य शिरसा नंदी प्रोवाच परमेश्वरं २

२९ ॥ नंदीश्वर उवाच ॥ भगवन्देवदेवेश लोकनाथ जगत्प्रभो ॥ भक्तोस्मि तव दा
सोस्मि प्रसादः क्रियतां मयि ॥३०॥ देव्यास्तवमिमं पुण्यं दुर्लभं च सुरैरपि ॥ श्रोतुमि
च्छाम्यहं देव प्रभावमपि चास्य च ॥३१॥ ईश्वर उवाच ॥ शृणु नंदिन्महाभाग स्त
वराजमिमं शुभं ॥ सहस्रैर्नामभिर्दिव्यैः सिद्धिदं सुखमोक्षदं ॥३२॥ शुचिभिः प्रा
तरुत्थाय पठितव्यं समाहितैः ॥ त्रिकालं श्रद्धया युक्तैर्नातः परतरः स्तवः ॥३३॥ ॐ
अस्य श्रीभवानीसहस्रनामस्तवराजस्य श्रीमहादेव ऋषिः ॥ आ
द्याशक्तिः भगवती भवानी देवता अनुष्टुप् छंदः श्रीभवानीप्रीत्यर्थे जपे विनियोगः

महाविद्याजगन्मातामहालक्ष्मीः शिवप्रिया ॥ विष्णुमायाशिवाशांतासिद्धासिद्धस
॥२४॥ रस्वतीक्षमाकांतिःप्रभाज्योत्स्नापार्वतीसर्वमंगला ॥ हिंगुलाचंडिकादांतापद्मा
लक्ष्मीर्हरिप्रिया ॥२५॥ त्रिपुरानंदिनीनंदासुनंदासुरवंदिता ॥ यज्ञविद्यामहामायावे
दमातासुधाधृतिः ॥२६॥ प्रीतिःप्रियाप्रसिद्धाचमृडानीविंध्यवासिनी ॥ सिद्धिविद्या
महाशक्तिःपृथ्वीनारदसेविता ॥ पुरुहूतप्रियाकांतिःकामिनीपद्मलोचना ॥
प्रह्लादिनीमहामातादुर्गादुर्गतिनाशिनी ॥२७॥ ज्वालामुखीसुगोत्राचज्यो २
तिःकुमुदवासिनी ॥ दुर्गमादुर्लभाविद्यास्वर्गतिःपुरवासिनी ॥२८॥ अपर्णा

शांबरीमायामुदितामृदुहासिनी ॥ नारायणीमहानिद्रायोगनिद्राप्रभावती ॥
२०॥ प्रज्ञापारमिताप्राज्ञातारामधुमतीमधु ॥ क्षीरार्णवसुताहाराकालिकासिंह
गामिनी ॥३१॥ उकाराचसुधाकाराचेतनाकोपनाकृतिः ॥ अर्द्धबिंदुधराधारा
विश्वमाताकलावती ॥३२॥ पद्मावतीसुवस्त्राचप्रबुद्धाचसरस्वती ॥ कुंडासना
जगद्धात्रीबुद्धमाताजिनेश्वरी ॥३३॥ जिनमाताजिनेंद्राचसारदाहंसवाह
ना ॥ राज्यलक्ष्मीवषट्कारासुधाकारासुधात्मिका ॥३४॥ राजनीतिस्त्रयीवार्ता
दंडनीतिःक्रियावती ॥ सद्भूतिस्तारिणीश्रद्धासद्गतिःसत्परायणा ॥३५॥ सिंधुर्मंदा

किनी गंगा यमुना च सरस्वती ॥ गोदावरी विपाशा च कावेरी च शतद्रुका ॥ ३६ ॥ सर
यूश्चंद्रभागा च कौशिकी गंडकी शुचिः ॥ नर्मदा कर्मनाशा च चर्मण्वती च वेदि
का ॥ ३७ ॥ वेत्रवती वितस्ता च वरदा नरवाहना ॥ सती पतिव्रता साध्वी सुचक्षुः
कुंडवासिनी ॥ ३८ ॥ एकचक्षुः सहस्राक्षी सुश्रोणि र्भगमालिनी ॥ सेनाश्रेणि
पताका च सुव्यूहा युद्धकांक्षिणी ॥ ३९ ॥ पताकिनी दयारंभा विपंची पंचमप्रि
या ॥ परा परकलाकांता त्रिशक्ति र्मोक्षदायिनी ॥ ४० ॥ ऐंद्री माहेश्वरी ब्रा
ह्मी कौमारी कमलासना ॥ इच्छा भगवती धेनुः कृपावती ॥ ४१ ॥ वज्रायुधा कांम धेनुः

वज्रहस्ता च चंडी च चंडपराक्रमा ॥ गौरी सुवर्णवर्णा च स्थितिसंहारकारिणी ॥
४२ ॥ एकानेकामहेज्या च शतबाहु र्महाभुजा ॥ भुजंगभूषणा भूषा षट्च
क्रक्रमवासिनी ॥ ४३ ॥ षट्चक्रभेदिनी श्यामा कायस्था कायवर्जिता
॥ सुस्मिता सुमुखी क्षामा मूलप्रकृति रीश्वरी ॥ ४४ ॥ अजा च बहुवर्णा
च पुरुषार्थप्रवर्तिनी ॥ रक्ता नीला सिता श्यामा कृष्णा पीता च कर्बुरा
॥ ४५ ॥ क्षुधा तृष्णा जरा वृद्धा तरुणी करुणालया ॥ कला काष्ठा मु

रूत्रांवनिमेषाकालरूपिणी ॥४६॥ सुवर्णरसनानाम्ना चक्षुःस्पर्शवतीरमा ॥ गंध
प्रियासुगंधा च सुस्पर्शा च मनोगतिः ॥४७॥ मृगनाभिर्मृगाक्षी च कर्पूरामो
दधारिणी ॥ पद्मयोनिः सुकेशी च सुलिंगा भगरूपिणी ॥४८॥ योनिमुद्रा म
हामुद्रा खेचरी खगगामिनी ॥ मधुश्रीर्माधवी वल्ली मधुमत्ता मदोद्धता ॥४९॥ मातं
गी शुकहस्ता च पुष्पबाणेषु चापिणी ॥ रक्तांबरधरा क्षीवा रक्तपुष्पावतंसि
नी ॥५०॥ शुभ्रांबरधरा धीरा महाश्वेता वसुप्रिया ॥ सुवेणी पद्महस्ता च मुक्ता
हारविभूषणा ॥५१॥ कर्पूरामोदनिःश्वासा पद्मिनी पद्ममंदिरा ॥ खड्गिनी खड् ५

हस्ता च चंडी परिघायुधा ॥५२॥ सुबाणशक्तिहस्ता च मयूरवरवाहना ॥ वा
पिनी पाशहस्ता च त्रिशूलवरधारिणी ॥५३॥ वराभयधरा धारा वीरापानमदोत्क
टा ॥ वसुधा वसुधारा च जया शाकंभरी शिवा ॥५४॥ विजया च जयंती च सुस्तनी शत्रु
नाशिनी ॥ कुमारी च सुपर्णा च कामाख्या कामवंदिता ॥५५॥ अंतर्वत्नी देवशक्ति
दा र्वरंवरधारिणी ॥ शीतला शीलविद्या च सुकुला कुलपूजिता ॥५६॥ शीतला च
सुशाला च बालग्रहविनाशिनी ॥ कुमारी च सुपर्वा च कामाख्ये कामवंदिता ॥५७

जालंधरधरानंताकामरूपनिवासिनी॥ कामबीजवतीसत्यासत्यधर्मपरा
यणा॥५८॥स्थूलमार्गस्थितासूक्ष्मासूक्ष्मबुद्धिप्रबोधिनी॥षट्कोण
चत्रिकोणत्रिनेत्रात्रिपुरसुंदरी॥५९॥वृषप्रियावृषारूढामहिषासुरघाति
नी॥शुंभदर्पहरादृप्तादीप्तपावकसन्निभा॥६०॥कपालभूषणाकालीक
पालामालधारिणी॥कपालकुंडलादीर्घाशिवदूतीघनध्वनिः॥६१॥सिद्धि ६

दाबुद्धिदानित्यासत्यमार्गप्रबोधिनी॥कंबुग्रीवावसुमतीछत्रछायाकृता
लया॥६२॥कुंडलिनीजगद्गर्भाभुजंगाकारशायिनी॥प्रोल्लसत्सप्तपद्माच
नाभिनालमृणालिनी॥६३॥मूलाधारानाकाराबह्निकुंडकृतालया॥वायु
कुंडसुखासीनानिराधारानिराश्रया॥६४॥तपस्विनीतपःसिद्धिस्तापसीचतपःप्रि
या॥तपोनिष्ठातपोयुक्तातपसःसिद्धिदायिनी॥६५॥सप्तधातुमयीमूर्तिःसप्त
धात्वंतराश्रया॥देहपुष्टिर्मनस्तुष्टिरन्नपुष्टिर्मदोद्धता॥६६॥कुषधीवैद्यमाता॥
वैद्यशक्तिःप्रभावती॥वैद्यविद्याचिकित्साचसुपथ्यारोगनाशिनी॥६७॥मृगयामृ

गमांसोदा मृगत्वक् मृगलोचना॥ वागुरा बंधरूपा च वधरूपा वधोद्यता॥६८॥ बं
दीबंदीसुता कारा काराबंधविमोचिनी॥ शृंखलाखलहा विद्युत् दृढबंधविमोचिनी
॥६९॥ अंबिका बालिका चांबा स्वस्था साधुजनार्चिता॥ कौलकी कुलविद्या च सकु
लाकुलपूजिता॥७०॥ कालचक्रभ्रमिर्भ्रांता विभ्रमाभ्रमनाशिनी॥ वात्यालीमेघ
माला च सुवृष्टिः सस्यवर्द्धिनी॥७१॥ अकारा च इकारा च उकारांबरवा
सिनी॥ ह्रींकारा बीजरूपा च ऐं क्लींकारस्वरूपिणी॥७२॥ सर्वाक्षरम
यी शक्तिरक्षरा वर्णमालिनी॥ सिंदूरारुणवर्णा च सिंदूरतिल

कप्रिया॥७३॥ वश्या च वश्यबीजा च लोकवश्यविधायिनी॥ नृपवश्या नृपैः से
व्या नृपवश्यकरीक्रिया॥७४॥ महिषी नृपमान्या च नृमाता नृपनंदिनी॥ नृपधर्म
मयी धन्या धनधान्यविवर्द्धिनी॥७५॥ चातुर्वर्ण्यमयी मूर्त्तिश्चतुर्वर्णैश्च पूजिता॥ स
र्ववर्णमयी सिद्धिश्चतुराश्रमवासिनी॥७६॥ ब्राह्मणी क्षत्रिया वैश्या शूद्रा
चावरवर्णजा॥ वेदमार्गरता यज्ञा वेदविद्याविनाविनी॥७७॥ अस्त्रशस्त्र
मयी विद्या वरशस्त्रास्त्रधारिणी॥ सुमेधा सत्यमेधा च भद्रकाल्यपराजि
ता॥७८॥ गायत्री सत्कृतिः संध्या सावित्री त्रिपदाश्रया॥ त्रिसंध्या त्रिपदी धात्री सुख

रासामगायिनी ॥७९॥ पांचालीकालिकाबालाबालक्रीडासनातनी ॥ गर्भाधा
रधराशून्यागर्भाशयनिवासिनी ॥८०॥ सुरारिघातिनीकृत्यापूतनाचतिलोत्त
मा ॥ लज्जारसवतीनंदानवानीपापनाशनी ॥८१॥ पट्टांबरधरागीतिः सुगी
तिर्ज्ञानगोचरा ॥ सप्तस्वरमयतंत्रीषड्ज मध्यमधैवता ॥८२॥ मूर्छनाग्राम
संस्थानास्वस्थासुस्थानवासिनी ॥ अट्टाट्टहासिनीप्रेताप्रेतासननिवा
सिनी ॥८३॥ गीतनृत्यप्रियाकामातुष्टिदापुष्टिदाक्षमा ॥ निष्ठासत्यप्रिया ८
प्रज्ञालोकेशावसुरोत्तमा ॥८४॥ सविषाज्वालिनीज्वालाविषमोहार्तिनाशिनी

॥ विषारिर्नागदमनीकुरुकुल्लामृतोद्भवा ॥८५॥ भूतभीतिहरारक्षाभूतावेश
विनाशिनी ॥ रक्षोघ्नीराक्षसीरात्रिर्दीर्घनिद्रादिवागतिः ॥८६॥ चंद्रिकाचंद्र
कांतिश्चसूर्यकांतिर्निशाचरी ॥ डाकिनीशाकिनीशिक्षाहाकिनीचक्रवासिनी ॥८७॥
शीताशीतप्रियास्वांगासकलावंनदेवता ॥ गुरुरूपधरागुर्वीमृत्युमारीविशार
दा ॥८८॥ महामारीविनिद्राचतंद्रामृत्युविनाशिनी ॥ चंद्रमंडलसंकाशाचंद्रमंड
लवर्तिनी ॥८९॥ अणिमादिगुणाधारासुस्पृहाकामरूपिणी ॥ अष्टसिद्धिप्र
दाप्रौढादुष्टदानवघातिनी ॥९०॥ अनादिनिधनापुष्टिश्चतुर्बाहुश्चतुर्मुखी ॥ चतुर

श्रीशाया शांता चतुर्वर्गफलप्रदा ॥ ९१ ॥ काशपुष्पप्रतीकाशा शरत्कुमुदलोचना
॥ भूतभव्यभविष्या च शैलजा शैलवासिनी ॥ ९२ ॥ वाममार्गरता वामा शिववामां
गवासिनी । वामाचारप्रिया तुष्टिर्लोपामुद्राप्रबोधिनी ॥ ९३ ॥ भूतात्मा परमात्मा च भू
तभावविभाविनी । मंगला च सुशीला च परमार्थप्रबोधिका ॥ ९४ ॥ दक्षिणा दक्षिणा
मूर्तिः सुदक्षिणा करप्रिया । योगिनी योगयुक्ता च योगांगा ध्यानशालिनी ॥ ९
५ योगपट्टधरा मुक्ता मुक्तानां परमा गतिः ॥ नारसिंही सुजन्मा च त्रिव
र्गफलदायिनी ॥ ९६ ॥ धर्मदा धनदा नित्या कामदा मोक्षदा द्युतिः ॥ ९

साक्षिणी क्षणदा दक्षा दक्षजा कोटिरूपिणी ॥ ९७ ॥ ऋतुः कात्यायनी स्वस्था
स्वच्छंदा च कविप्रिया ॥ सत्यागमा बहिस्था च काव्यशक्तिः कवित्वदा ॥ ९
८ मेनापुत्री सती यात्रा मैनाकभगिनी तडित् ॥ सौदामिनी सुदामा च धाम
गा धामशालिनी ॥ ९९ ॥ सौभाग्यदायिनी द्यौश्च सुभगा द्युतिवर्धिनी ॥ श्रीकृ श्री
त्तिवसना कृत्तिका कुलवासिनी ॥ १०० ॥ रक्तबीजवधोद्रिक्ता सुतं
तुबीजसंस्थिता ॥ जगज्जीवा जगद्बीजा जगत्त्रयहितैषिणी ॥ १०१ ॥ चामीकरेवचं
द्रेवसाक्षाद्या षोडशीकला । यत्तत्पदानुबंधा च यक्षिणी धनदार्चिता ॥ १०२ ॥ वि

त्रिगुणी चित्रमाया च विचित्रभुवनेश्वरी । चामुंडा मुंडहस्ता च चंडमुंडवधोद्यता ॥ १
०३ अष्टम्येकादशी पूर्णा नवमी च चतुर्दशी । उमा कलशहस्ता च पूर्णकुंभधरा
धरा ॥ १०४ ॥ अनीरु भैरवी धारा भीमा त्रिपुरभैरवी । महाचंडा च रौद्री च महाभैर
वपूजिता ॥ १०५ ॥ निर्मुंडा हस्तिनी चंडा करालदशनानना । करालाविकरा
ला च घोरा घुर्घुरनादिनी ॥ १०६ ॥ रक्तदंतोर्ध्वकेशी च बंधूककुसुमारुणा ॥ कादंब
रीपताशा च काश्मीरी कुंकुमप्रिया ॥ १०७ ॥ क्षांतिर्बहुसुवर्णा च रतिर्बहुसु २०
वर्णदा ॥ मातंगिनी वरारोहा मत्तमातंगगामिनी ॥ ८ ॥ हंसा हंसगतिर्हं

सी हंसोज्ज्वलशिरोरुहा । पूर्णचंद्रमुखी श्यामा स्मितास्या च सुकुंडला ॥ ९ ॥ मखी च ले
खिनी लेखमा सुलेखा लेखकप्रिया ॥ शंखिनी शंखहस्ता च जलस्था जलदेवता ॥ १० ॥
कुरुक्षेत्रावनिः काशी मथुरा कांच्यवंतिका । अयोध्या द्वारका माया तीर्था तीर्थकरप्रि
या ॥ ११ ॥ त्रिपुष्करा प्रमेया च कोशस्था कोशवासिनी । कौशिकी च कुशावर्ता कौशां
बी कोशवर्धिनी ॥ १२ ॥ कोशदा पद्मकोशाक्षी कुसुंभकुसुमप्रिया । तोतला च
तुला कोटिः कोटस्था कोटराश्रया ॥ १४ ॥ स्वयंभूश्च स्वरूपा च सुरूपा रूपवर्धिनी ॥
तेजस्विनी सुभिक्षा च बलदा बलशालिनी ॥ १५ ॥ महाकोशी महागर्त्ता बुद्धिः सदस

दाम्भिका । महाग्रहहरा सौम्या विशोका शोकनाशिनी ॥१६॥ सात्त्विका सत्त्व
संस्था च राजसी च रजोरता ॥ तामसी च तमोयुक्ता गुणत्रयविभाविनी ॥
१७ ॥ अमूर्ता मूर्तरूपा च वेदविद्या च शाम्भवी ॥ कल्याणी शंकरा कल्या
मनःसंकल्पसंतती ॥१८॥ सर्वलोकमयी शक्तिः सर्वश्रवणगोचरा ॥ सा
र्वज्ञानमयी वांछा सर्वतत्त्वावबोधिका ॥१९॥ जाग्रतिश्च सुषुप्तिश्च स्वप्ना
वस्था तुरीयका ॥ त्वरा मंदगतिर्मंदा मदिरामोदवाहिनी ॥२०॥ पानभूमिः २८
पानपात्रा पानदानकरोद्यता । आघूर्णारुणनेत्रा च किंचिदव्यक्तभाषिणी

॥२१॥ आशापूरी च दीक्षा च दक्षा दीक्षितपूजिता ॥ नागवल्ली नागकन्या भो
गिनी भोगवल्लभा ॥२२॥ सर्वशास्त्रमयी विद्या सुस्मृतिर्धर्मवादिनी । श्रुतिः
स्मृतधरा ज्येष्ठा श्रेष्ठा पातालवासिनी ॥२३॥ मीमांसा तर्कविद्या च सुभक्ति
र्भक्तवत्सला ॥ सुनाभिर्यातनाजातिर्गंभीरा भाववर्जिता ॥२४॥ नागपाश
धरामूर्त्तिरगाधा नागकुंडला ॥ सुचक्रा चक्रमध्यस्था चक्रकोणनि
वासिनी ॥२५॥ सर्वमंत्रमयी विद्या सर्वमंत्राक्षरावरा । मधुस्रवा स्रवंती
च भ्रामरी भ्रमरालिका ॥२६॥ मातृमंडलमध्यस्था मातृमंडलवासिनी

॥कुमारजननी कुंभा सुमुखी ज्वरनाशिनी॥२७॥ अनीता विद्यमाना च भा-
विनी प्रीतिमंजरी॥ सर्वसौख्यमयी शक्तिराहारपरिणामिनी॥२८॥ निदानं
पंचभूतानां भवसागरतारिणी॥ अक्रूरा च ग्रहवती विग्रहा ग्रहव-
र्जिता॥२९॥ रोहिणी भूमिगर्भा च कालभूः कालवर्तिनी॥ कलंकर-
हिता नारी चतुःषष्ट्यभिधायिनी॥३०॥ जीर्णा च जीर्णवस्त्रा च नूतना
नंदवल्लभा। अजरा च रतिःप्रीति रतिरागविवर्धिनी॥३१॥ पंचवातग-
तिर्भिन्ना पंचश्लेष्माशयाधरा। पंचपित्तवती पंक्तिः पंचस्थानविभाविनी १२

॥३२॥ ऋतुवती कामवती बहिःप्रस्रवणी त्रिहा। रजःशुक्रधरा शक्तिर्जरा-
युर्गर्भधारिणी॥३३॥ त्रिकालज्ञा त्रिलिंगा च त्रिमूर्तिः पुरवासिनी। अरा-
गा शिवतत्वा च कामतत्वानुरागिणी॥३४॥ प्राच्यवाची प्रतीची च दिगु-
दीची विदिग्दिशा॥ अहंकृतिरहंकारा बालमाया बलिप्रिया॥३५॥ शुक्र-
श्रुवा सामधेनी च सुश्राद्धा श्राद्धदेवता॥ माता मातामही तृप्तिः पितुर्मा-
ता पितामही॥३६॥ स्नुषा दौहित्रिणी पुत्री पौत्री नप्त्री स्वसा प्रिया॥ स्त-
नदा स्तनधारा च विश्वयोनिस्तनंधयी॥३७॥ शिशूत्संगधरा दोला॥

दोलाक्रीडाभिनंदिनी। उर्वशी कदली केका विशिष्या शिरिवर्त्तिनी॥३
७। षडंगधारिणी षड्वाणाणुं स्वानुवर्त्तिनी॥ लक्ष्मप्राप्तिर्मदालक्ष्मा सुल
क्ष्मालक्ष्मभूषणा॥३८॥ वर्त्तनी सुपथ्याचारा परिषा च स्वनिर्वृतिः। प्राकार
वलया वेला मर्यादा च महोदधेः॥३९॥ पोषिणी शोषिणी शक्ति दीर्घके
शी सुलोमशा॥ लालसा इपा मलातन्वी वेदवेदांगधारिणी॥४०॥ नरास्थिक
पानमत्ता च नरमुंडास्थिभूषणा। अक्षक्रीडारति मारी सारिकाशुकभा १२
षिणी॥४१॥ शांबरी गारुडी विद्या वारुणी वरुणार्चिता॥ वाराही तुं

सं

उदस्ना च दंष्ट्रोहृ नवसुंधरा॥४२॥ मीनमूर्त्तिधरा मूर्त्ति वदान्या प्रा
तिमाश्रया॥ अमूर्त्ता निधिरूपा च सुसंस्कारा च संस्मृतिः॥४३॥ स्मृ
तिस्कार रूपा च शालिग्राम शिलाशुचिः। प्राज्ञता दशना षा च
गाथा गीतिः प्रहेलिका॥४४॥ इडा च पिंगला पिंगा सुषुम्णा सूर्यवाहिनी। शा
शिश्रवा च तालुस्था काकिनी मृतजीविनी॥४५॥ अणुरूपा बृहद्रूपा लघु
रूपा गुरुस्थिता॥ स्थावरा जंगमा देवी ऊनकर्मफलप्रदा॥४६॥ वि
षयाक्रांतदेहा च निर्विषा च जितेंद्रिया॥ विश्वरूपा चिदानंदा परब्रह्म

वबोधिनी॥४७॥निर्विकारा च निर्वैरा विरतिः सत्ववर्द्धिनी।पुरुषाज्ञाना
भिन्ना च रमा निःकैवल्यदायिनी॥४८॥विविक्तसेविनी प्रज्ञाजनित्री च बहुश्रु
ता।निरीहा च समस्तैका सर्वलोकैकसंश्रया॥४९॥सेव्या सेवाप्रिया सेवा
सेवाफलविवर्द्धिनी।कलौ कल्किप्रिया शीला दुष्टम्लेच्छविनाशिनी॥५०॥प्रत्यं
चा च धनुर्यष्टिः खड्गधाराधरा रये।अश्वप्लुतिश्च वल्गा च सृणिः सा मत्तवा
रणे॥५१॥वीरसूर्वीरमाता च वीरसूर्वीरनंदिता।जयश्रीर्जयदीक्षा च जय २४
दा जयवर्द्धिनी॥५२॥सौभाग्यसुभगाकारा सुखसौभाग्यवर्द्धिनी।क्षे

मंकरी सिद्धिरूपा सत्कीर्त्तिः पथिदेवता॥५३॥सर्वतीर्थमयी मूर्त्तिः
सर्वदेवमयी प्रजा॥सर्वसिद्धिप्रदा शक्तिः सर्वमंगलसंयुता॥५४॥पुण्यं स
द स्वनामेदं शिवायाः शिवभाषितं।यः पठेत्प्रातरुत्थाय शुचिर्भूत्वा स
माहितः॥५५॥यश्चापि शृणुयान्नित्यं नरो निश्चलमानसः॥एककालं द्वि क
कालं वा त्रिकालं श्रद्धयान्वितः॥५६॥सर्वदुःखविनिर्मुक्तो धनधान्य
सुतान्वितः॥तेजस्वी बलवान् शूरः शोकरोगविवर्जितः॥५७॥यशस्वी
बलवान् धन्यः सुभगो लोकपूजितः।रूपवान् गुणसंपन्नः प्रज्ञावीर्यसमन्वितः

।५८। श्रेयांसि लभते नित्यं निश्चलां च शुभां श्रियं। सर्वपापविनिर्मुक्तो लो
भक्रोधविवर्जितः।५९ नित्यं बंधुसुतैर्दारैः पुत्रपौत्रमहोत्सवैः। नंदितः सेवि
तो भृत्यै बहुभिः शुद्धिमानसैः॥६०॥ विद्यानां पारगो विप्रः क्षत्रियो विज
यी रणे॥ वैश्यस्तु धनलाभाढ्यः शूद्रस्तु सुखमश्नुते।६१।पुत्रार्थी लभते पु
त्रान् धनार्थी लभते धनं। इच्छाकामं तु कामार्थी धर्मार्थी धर्ममक्षयं
।६२ कन्यार्थी लभते कन्यां रूपशीलगुणान्वितां। क्षेत्रं च बहुसस्यं स्यात् १५
गावश्च बहुदुग्धदाः।६३।नाशुभं नापदस्तस्य न भयं नृपशत्रुतः॥

जायते नाशुभा बुद्धिर्लभते कुलधूर्यतां।६४।न बाधंते ग्रहास्तस्य न
रक्षांसि न पन्नगाः॥न पिशाचा न डाकिन्यो भूतव्यंतरसंतिनाः।६
५।बालग्रहाभिभूतानां बालानां शांतिकारकं॥ द्वंद्वानां प्रीतिने देव
मैत्रीकरणमुत्तमं।६६।लोहपाशैर्दृढं बंधो बंदिवेश्मनि दुर्गमे॥ तिष्ठ
न् स्मरन्नेव न पठन्नमस्यो मुच्यते नात्र संशयः।६७ न दाराणां न पुत्राणां न
बंधूनां न मित्रजं।।। पश्यंति न दिने शोकं वियोगं चिरजीविनां॥६८॥
अंधस्तु लभते दृष्टिं चक्षूरोगैर्न बाध्यते। बधिरः श्रुतिमाप्नोति मूको

वाचं शुभां नरः ॥६९॥ पतन्त्या भार्यया नारी स्थिरगर्भा च जायते ॥ स्राविणी
बद्धगर्भा तु सुखमेव प्रसूयते ॥७०॥ कुष्ठिनः क्षीणदेहा ये गतनकेशनख
त्वचः ॥ पठनाच्छ्रवणाद्वापि दिव्यकाया भवंति ते ॥७१॥ ये पठंति सदा भक्त्या
शुद्धिमंतो जितेंद्रियाः । अपुत्राः प्राप्नुयुः पुत्रान् एवं नोपि न संशयः ॥७२॥ महा
व्याधिपरिग्रस्तास्तप्ता ये विविधैर्ज्वरैः ॥ भूताभिषंगसंत्रस्ताश्चातुर्थिकतृ
तीयकैः ॥७३॥ अन्यैश्च दारुणै रोगैः पीड्यमानाश्च मानवाः । गतबाधाश्च जा १६
यंते ते मुक्ता नात्र संशयः ॥७४॥ श्रुतग्रंथधरा बाला दिव्यवाणीकवीश्व

राः । पठनाच्छ्रवणाद्वापि नवत्सेवन संशयः ॥७५॥ अष्टम्यां च चतु
र्दश्यां नवम्यां चैकचेतसः ॥ ये पठंति सदा भक्त्या न ते वै दुःखभा
गिनः ॥७६॥ नवरात्रं जिताहारो दृढभक्तिर्जितेंद्रियः ॥ चंडिका
यतने विद्वान् शुचिष्मान् मूर्तिसंनिधौ ॥७७॥ एकाकी तु शतावर्तं पठं
न् धीरश्च निर्भयः ॥ साक्षाद्भगवती तस्मै प्रयच्छेदीप्सितं फलं ॥७८॥ सिद्ध
पीठे गिरौ रम्ये सिद्धक्षेत्रे सुरालये ॥ पठनात्साधकस्याशु सिद्धिर्भवति वां
छिता ॥७९॥ दशावर्तं पठेद्यस्तु भूमिशायी नरः शुचिः ॥ स्वप्ने मूर्तिमयीं दे

वींवरदांसोपिपश्यति॥८०॥आवर्त्तनसदृशैस्तुपरं निपुरुषोत्त
माः। तेसिद्धाःसिद्धिदालोकेज्ञापानुग्रहएत्रमाः॥८१॥कविवेसंस्कृते
तेषांज्ञास्वाएांमाऋनौस्वतः॥ज्ञाकिःप्रोन्मीलनेनेननाधीनेष्वपिजा
रती॥८२॥नखरागशिरोरत्नविगुएाक्रनरोविषः॥प्रयच्छंनश्चसर्वस्वं
सेवंनेतंनरेश्वराः॥८३॥रोचनाविरिवितंनूर्न्कंकुंकुमेनस्तुत्रेदिने॥धार
येद्यंत्रितंदेदेप्रजयित्वाकुमारिकां॥८४॥विप्रांश्चवरनार्यश्चधूपैःकु
सुमचंदनैः॥क्षीरखंडादिभोज्यांश्चभोजयित्वाबुभुक्षितान्॥८५॥बध्नं।

तियेमदारज्ञांबालानांचविशेषतः॥भवंतिनृपपत्न्यास्तेकीर्त्तिभोजोय
शस्विनः॥८६॥शत्रुनोनत्रयंतेषांदुर्जनेभ्योनराजतः॥नचदाराग्नि
चाराणिनदारिद्यंनदुर्गतिः॥८७॥मदार्णवेमदानद्यांपोत
स्थेपिनत्नीःकचित्॥रणेद्यूतेविवादेचविजयंप्राप्नुवंतिते॥८८॥नृपा
श्चवश्यतांयांतिनृपमान्याश्चयेनराः॥सर्वत्रप्रियतेलोकेबंहुमानपुरः
सरं॥९०॥रतिरागविवशाश्चविकलाःकामपीडिताः॥यौवनाक्रांतदेहा
स्तान्प्रयंतेवामलोचनाः॥९१॥लिखितंमूर्छ्निकंठेवाधारयेद्यो

१७

र ऐश्चर्यै: ॥ सर्वधायुस्म मानं तं प्रति योगान पश्यति ।९२। केनौच
डुंडु चौ येषां तिष्टे दैलि रिवतं रऐ ॥ मायासैन्य परिग्रस्तान् कांदि
शीकां नद्द नौजसः ।९३। विचेतनान् विमूढांश्च शास्त्रकन्यविवर्जितान् ।नि
र्जित्यशत्रुसंघानं लननेविजटांश्च वं ।९४। नाभिचारान्नाशापांश्चवाणवी
रादिकीलनं ॥ डाकिनीरतनाक्रम्यामदामारीचशाकिनी ।९५। नू
नाः प्रेताः पिशाचाश्च रक्षांसि व्यंतराणि च ॥ नविशंति गृहे देदेति २८
शिवंतं यत्र तिष्ठति ।९६। न शास्त्रानलतोयौघैर्न यं क्कापि न जोया ।

ते ॥ दुर्वृत्तानां च पापानां बलहानिकरं परं ।९७। मंदुराकरिशा
लासु गवां गोष्टे समाहितः ॥ पठेत्तद्दोषशांत्यर्थं कोणपांकुलनाश
नं ।९८। यमहृतानपश्यति नरा निरययातनां ॥ प्राप्नुवंत्सज्जयांशां
तिं शिवलोकं सनातनं ।९९। सर्वबाधासु घोरासु सर्वदुःखनिवार
णं । सर्वमंगलकृत्स्वर्ग्यं पठितव्यं समाहितैः ।१००। पुण्यं सदस्वा ।
नामेदमुमायारुद्रभाषितं । चतुर्वर्गप्रदं सत्यं तंदिकेन प्रकाशितं ।
१०१ । नातःपरतरो मंत्रो नातःपरतरं तपः । नातःपरतरा विद्या नी ।

र्थिनातःपरंपरं ॥२०॥ तेधन्याःकृतपुण्यास्तेतएवभुविपूजिताः ॥ एकना

वंसदानित्यंध्येयंचध्यंतिमहेश्वरीं ॥३॥ देवतानांदेवतायाब्रह्माद्यैर्याचरा 295

जिता ॥ नूयाच्छांबरदालोकेसाधूनांसर्वमंगला ॥२०४॥ इतिश्री

रुद्रयामलेनंदिकेश्वरसंवादेशिवप्रोक्तंभवानीसहस्र

नामस्तोत्रंसमाप्तं ॥ ॥ संवत १७८७ वर्षे भाद्रपदसुदि ४ रविवा

सरेकायस्थजातिठाकुरश्रीपरमनारायणसुतलक्ष्मीनारायणेनलि ॥ २९

खितं ॥ ॥ ॥